# READING - 4

यदा नृपस्यानुज्ञामाप्नोति रामस्तदा मुनिना सह सो ऽरण्यं गच्छति । तत्र वने बहव ऋषयो वसन्त्याश्रमेषु । ते सर्वदा ध्यानमाचरन्ति यज्ञान्कुर्वन्ति च । तस्मिन्नेव काले बहवो राक्षसास्तान्मुनीन्बाधन्ते । राक्षसेभ्यो मुनीनां रक्षणायागच्छति रामः । बालको ऽपि स वीरो बहून्राक्षसानिषुभिर्हन्ति । यत्र यत्रायाति राघवस्ततस्ततो निशाचरा बिभ्यति पलायन्ते च । यत्र कुत्रापि राक्षसान्पश्यतो रामो लक्ष्मणश्च तत्र तेषां गात्राणि छिन्त्तः । यदा सर्वे निशाचरा हता निर्गता वा सन्ति तदा रामो वनं जहाति मिथिलां चागच्छति । तस्मिन्देशे ऽतीव पण्डितो नृपो जनको नाम राज्यं करोति । जनकस्यातीव रमणीया कन्या सीता नाम । सर्वासां नारीणां श्रेष्ठा सेति चिन्तयन्ति जनाः । सीतया सह विवाहं करोमीति चिन्तयन्ति सर्वे नृपाः । ततस्ते मिथिलायां समागच्छन्ति ॥